वाराहगृह्यसूत्र

नमो यज्ञवराहाय

अतः परं परिशिष्टा मैत्रायणीयसूत्रस्य । गृह्यपुरुषः प्रायश्चित्तं अनुग्रहिक-हौतृकशुल्विकोत्तरेष्टकवैष्णवाध्वर्यविकचातुर्होतृकगोनामिकाकुलपाद-रहस्यप्रतिग्रहयमकवृषोत्सर्गप्रश्नद्रविणषट्कारणप्रधानसान्देहिकप्रवराध्या-यरुद्रविधानछन्दोऽनुक्रमणी अन्तर्क्यकल्पप्रवासविधिप्रातरुपस्थानभूतोत्प-त्तिरिति द्वाविँशतिः परिशिष्टसंख्यानाम् १ गृह्येऽग्नौ पाकयज्ञान्विहरेत् २ हस्वत्वात्पाकयज्ञः । ह्रस्वँ हि पाक इत्याचक्षते ३ दर्शपूर्णमासप्रकृतिः पाकयज्ञविधिरप्रयाजोऽननुयाजोऽसामिधेनीकः ४ स्वाहाकारान्तं निगद्य हो-माः ५ परतन्त्रोत्पत्तिः दक्षिणाग्नावाहिताग्निः कुर्वीत शालाग्नावनाहिताग्निः ६ गोमयेन गोचर्ममात्रं चतुरस्रँ स्थण्डिलमुपलिप्येषुमात्रं तस्मिन्लक्षणं कु-र्वीत--सत्यसदसीति पश्चार्धादुदीचीं लेखां लिखति । ऋतसदसीति दक्षिणार्धात्प्राचीम् । धर्मसदसीत्युत्तरार्धात्प्राचीम् । मध्ये द्वे तिस्रो वा प्राचीः । ऊर्जस्वतीति दक्षिणाम् । पयस्वतीत्युत्तराम् । इन्द्राय त्वेति मध्याद्वा । सर्वाः प्रादेशमात्र्यो दर्भेणावलिखेत् ७ अद्भिः प्रोक्ष्याग्निँ सादयति ८ परिसमुह्य परिस्तीर्य पर्युक्ष्य तूष्णीमिध्माबर्हिः संनह्य ग्रागग्रै-र्दक्षिणारम्भैरुदक्सँस्थैरयुग्मैर्धातुभिः स्तृणाति ९ दक्षिणतोऽग्नेर्ब्रह्माणमुपवे-श्योत्तरत उदपात्रम् १० बर्हिषः पवित्रे कुरुते ११ समावप्रच्छिन्नप्रान्तौ दर्भौ प्रादेशमात्रौ पवित्रे स्थो वैष्णव्ये इत्योषध्या छित्त्वा विष्णोर्मनसा पूते स्थ इत्यद्भिस्त्रिरुन्मृज्य प्रोक्षणीर्धर्मैः सँस्कृत्य प्रणीतां प्रणीय निर्वपणप्रोक्षण-सँवपनमिति यथादेवतं चरुमधिश्रित्य स्रुक्स्रुवं प्रमृज्याभ्युक्ष्याग्नौ प्रताप्य--अदितिरसि नाच्छिन्नपत्रेत्याज्यमग्नावधिश्रयति १२ पृश्नेः पयोऽसीत्याज्यं निर्वपति १३ परि वाजपतिरित्याज्यँ हविश्च त्रिः पर्यग्नि करोति १४ देवस्त्वा सवितोत्पुनात्वित्याज्यँ श्रपयति १५ तूष्णीमिध्माबर्हिर्विप्रोक्ष्य यथाम्नात-मभिपरिस्तृणाति १६ परिधीन्परिदधाति १७ तेजोऽसीत्याज्यमवेक्ष्य पश्चाद-ग्नेर्दर्भेष्वासादयति १८ अभिघार्य स्थालीपाकमुत्तरत उद्वासयति १९ सकृ-देवेध्ममाधाय वैरूपाक्षः प्रथमो होमानाम् २० ब्रह्माणमामन्त्र्य समिध-

माधायाघारावाघार्याज्यभागौ हुत्वा युनज्मि त्वेति च योजयित्वा २१ न ह्ययुक्तो हव्यँ वहत इति ह विज्ञायते २२ कामं पुरस्ताद्धुरो जुहोति--

युक्तो वह जातवेदः पुरस्तादिदँ विद्धि क्रियमाणँ यथेह
त्वं भिषग्भेषजस्यासि गोप्ता त्वया प्रसूता गामश्वं पूरुषँ सनेम । स्वाहा

इति । विश्वा अग्ने त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विषम् । इति २३ नक्षत्रमिष्ट्वा देवताँ यजेत । अहोरात्रमृतुं तिथिं च २४ अभि-घार्य यद्देवतँ हविः स्यात्तच्च जुहुयाद्यथादेवतँ यथादेवतया चर्चा २५ आ-कूताय स्वाहा । आकूतये स्वाहेति जयान्जुहुयात् २६ प्रजापतिः प्राय-च्छत् । इडामग्न इति स्विष्टकृतमुत्तरार्धपूर्वार्धे जुहुयात् २७ मेक्षणमुप-यामं पवित्रे चान्वादध्यात् २८ अन्वद्य नो अनुमतिः । अन्विदनुमते त्वमिति भूः स्वाहेति प्रायश्चित्ताहुतीश्च २९ त्वन्नो अग्ने । स त्वन्नो अग्ने । मनो ज्योतिः । त्रयस्त्रिँशत्तन्तवः । अयाश्चाग्नेऽसीति च ३०

इमँ स्तनं मधुमन्तं धयापां प्रपीनमग्ने सलिलस्य मध्ये
उत्सं जुषस्व मधुमन्तमूर्मिँ समुद्रयँ सदनमाविशस्व । स्वाहा

इति परिधिविमोकमभिजुहोति ३१ अन्नपत इत्यन्नस्य जुहुयात् ३२ एधो-ऽस्येधिषीमहि स्वाहेति समिधमादधाति । समिदसि समेधिषीमहीति द्वि-तीयाम् ३३ बर्हिषि पूर्णपात्रं निनयेत् ३४ एषोऽवभृथः ३५ पाकयज्ञा-नामेतत्तन्त्रम् ३६ आपोहिष्ठीयाभिर्मार्जयित्वा पर्युक्षेत ३७ वरो दक्षिणा । अश्वँ वरँ विद्यात् । गामित्येके ३८

इति वाराहगृह्ये प्रथमं खण्डम्

प्राङ्मुखमुदङ्मुखँ वा सूतिकालयं कल्पयित्वा ध्रुवं प्रपद्ये शुभं प्रपद्य आशां प्र-पद्य इति काले प्रपादयेत् १ रेतो मूत्रमिति च्यावनीभ्यां दक्षिणं कुक्षिमभि-मृशेत् । श्रावयेद्वा २ पुत्रं जातमन्वक्षँ स्नातं न मातोपयन्यादा मन्त्रप्रयो-गात् ३ अग्नेरभ्याहितस्य परिसमूढस्य परिस्तीर्णस्य पश्चादहते वाससि कुमारं प्राक्शिरसमुत्तानँ सँवेश्य पलाशस्य मध्यमं पर्णं प्रवेष्ट्य तेनास्य क-

र्णावाजपेत्--भूस्त्वयि दधानीति दक्षिणे । भुवस्त्वयि दधानीति सव्ये । स्वस्त्वयि दधानीति दक्षिणे । भूर्भुवः स्वस्त्वयि दधानीति सव्ये ४ अथैनमभिमन्त्रयेते--अश्मा भव परशुर्भव हिरण्यमस्तृतं भव ।

अङ्गादङ्गात्संभवसि हृदयादधि जायसे
आत्मा वै पुत्रनामासि स जीव शरदः शतम्

इति ५ यत्र शेते तदभिमृशेत्--

वेद ते भूमि हृदयं दिवि चन्द्रमसि श्रितम्
वेदामृतस्य देवा माहं पुत्र्यमघँ रुदम् इति ६

आज्यँसँस्कृत्य ब्रह्माणमामन्त्र्य समिधमाधायाघारावाघार्याज्यभागौ हुत्वा व्याहृतिभिश्चतस्र आज्याहुतीर्जुहुयात् । जयाभ्यातानानाँ राष्ट्रभृतश्चैके ७ काँस्ये चमसे वाऽऽहुतिसंपातानवनीय तस्मिन्सुवर्णँ संनिघृष्य व्याहृतिभिः कुमारं चतुः प्राशयेत् । अत्यन्तमेके सुवर्णप्राशनमुदके निघृष्याद्वादशवर्षतायाः ८ इषं पिन्व । ऊर्जं पिन्वेति स्तनौ प्रक्षाल्य प्रधापयेत् । दक्षिणं पूर्वँ सव्यं पश्चात् ९ स्विष्टकृते हुत्वा प्रायश्चित्ताहुतीश्च समिधमाधाय पर्युक्षति १० एष कर्मान्तो बहिर्द्वारेऽग्निर्नित्यः । कणसर्षपयवानाँ होमः । व्याहृतिभिर्जुहुयात् ११ अप्रतिरथं जपेत् । इन्द्रो भूतस्येति षडर्चं च १२ सूतिकालयँ यथाकालँ समन्तादुदकेन परिषिञ्चेत् १३

इति वाराहगृह्ये द्वितीयं खण्डम्

एवमेव दशम्यां कृत्वा पिता माता च पुत्रस्य नाम दध्याताम्--घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्टानान्तं कृतं न तद्धितं द्व्यक्षरं चतुरक्षरँ वा त्यक्त्वा पितुर्नामधेयात् नक्षत्रदेवतेष्टनामानो वा १ द्विनामा तु ब्राह्मणः २ नामैव कन्यायाः--अकारव्यवधानमाकारान्तमयुग्माक्षरं नदीनक्षत्रचन्द्रसूर्यपूषदेवदत्तरक्षितावर्जम् ३ नवनीतेन पाणी प्रलिप्य सोमस्य त्वा द्युम्नेन्त्येनमभिमृशेत् ४ सर्वेषु कुमारकर्मस्वाग्नेयः स्थालीपाकः प्राजापत्यो वा ५

सर्वत्रानादेशेऽग्निः पुँसामर्यमा स्त्रीणाम् ६ सँवत्सरं मातापितरौ न माँसमश्नीयाताम् ७ पुत्रस्य जातदन्ते यजेताग्निं गवा पशुना वा ८ विप्रोषितः प्रत्येत्य पुत्रस्य मूर्धानं त्रिराजिघ्रेत्--पशूनां त्वा हिङ्कारेणाभिजिघ्रामीति ९ जातकर्मवद्धस्ताङ्गुलिं प्रवेष्टय तेनास्य कर्णावाजपेत् १० अथैनमभिमन्त्रयते--अश्मा भवेति ११ अग्निधन्वन्तरी पुत्रव्रती छागमेषाभ्यामिष्ट्वा दीर्घार्णाँ व्याहृतिभिः कुमारं चतुः प्राशयेत् । आयुर्दा देवेति च १२ कुमारकर्माणि शुक्ल उदगयने पुण्ये नक्षत्रे नवमीवर्जम् । सर्व ऋतवो विवाहेऽमाघचैत्रौ मासौ परिहाप्योत्तरं च नैदाघम् १३ अन्वारम्भयित्वा हवनम् १४

इति वाराहगृह्ये तृतीयं खण्डम्

तृतीयवर्षस्य जटाः कुर्वन्ति । यथा वा कुलकल्पः १ अग्निमुपसमाधाय परिसमुह्य परिस्तीर्य पर्युक्ष्य दक्षिणतोऽग्नेर्ब्रह्माणमुपवेश्योत्तरत उदपात्रँ शमीशमकवत् २ अथैनमभिमन्त्रयते--हिरण्यवर्णाः शुचयं इति चतसृभिः । या ओषधय इत्यनुवाकेन

शं नो देवीरभिष्टय आपो भवन्तु पीतये
शँ योरभि स्त्रवन्तु नः
प्रियाः शं न आपो धन्वन्याः शं नः सन्तु नूप्याः
शं नः समुद्र्या आपः शमु नः सन्तु कूप्याः
शं नो मित्रः शँ वरुणः शं नो भवत्वर्यमा
शं न इन्द्रश्चाग्निश्च शं नो विष्णुरुरुक्रमः

इति । तासामुदकार्थान्कुर्वीत--पर्युक्षणेऽभ्युन्दने स्नापने च ३ आज्यँ सँस्कृत्य ब्रह्माणमामन्त्र्य समिधमाधायाघारावाघार्याज्यभागौ हुत्वा--अग्न आयूँषि पवस इति सप्तभिः सप्त हुत्वा ४ आयुर्दा देवेति च । ये केशिनः प्रथमे सत्त्रमासत येभिरावृतँ यदिदँ विराजति । तेभ्यो जुहोम्यायुषे दीर्घायुत्वाय स्वस्तये । इति ५ व्याहृतिभिश्च ६ उक्तः कर्मान्तः पूर्वेण ७ शीतेन वाय उदकेनेधि । उष्णेन वाय उदकेनेधीति तप्ता इतराभिः सँसृज्य --आर्द्रदानव स्थ जीवदानव स्थोन्दतीरिषमावदेत्यपोऽभिमन्त्र्य दक्षिणं

केशान्तमभ्युन्द्यात्-अदितिः केशान्वपत्वाप उन्दन्तु जीवसे । दीर्घायुत्वाय स्वस्तये । इति ८ दक्षिणस्मिन्केशान्ते दर्भमूर्ध्वाग्रं निदधाति ९ ओषधे त्रायस्वैनमिति दर्भमन्तर्दधाति १० स्वधिते मैनँ हिँसीरिति क्षुरेणाभिनिदधाति ११

येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्
तेन ब्रह्माणो वपतेदमस्यायुष्मानयं जरदष्टिर्यथासत् । अहमसौ

इति प्रवपति १२ दक्षिणतो माताऽन्या वाऽविधवाऽऽनडुहेन गोमयेनाऽभूमिगतान्केशान्परिगृह्णीयात् १३

मा ते केशाननुगाद्वर्च एतत्तथा धाता दधातु ते
तुभ्यमिन्द्रो वरुणो वृहस्पतिः सविता वर्च आदधुः

इति प्रपततोऽनुमन्त्रयते १४ तेन धर्मेण पुनरपोऽभिमन्त्र्यापरं केशान्तमभ्युन्द्यादुत्तरं च १५ अन्यौ तु प्रवपनौ--

येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत्
तेन ते वपाम्यायुषे दीर्घायुत्वाय स्वस्तये

इति पश्चात्

येन भूयश्चरत्ययं ज्योक्च पश्यसि सूर्यम्
तेन ते वपाम्यायुषे दीर्घायुत्वाय सुश्लोक्याय सुवर्चसे

इत्युत्तरतः १६

यत्क्षुरेण पर्चयता सुपेशसा वप्तर्वपसि केशान्
शुन्ध शिरो मास्यायुः प्रमोषीः

इति लोहायसं क्षुरं केशवापाय प्रयच्छति १७ यथार्थं केशयत्नान्कुर्व-

न्ति--दक्षिणतः कपर्दा वसिष्ठानामुभयतोऽत्रिभार्गवकाश्यपानां पञ्चचूडा आङ्गिरसः शिखिनोऽन्ये १८ वाजिमेके मङ्गलार्थम् १९

त्र्यायुषं कश्यपस्य जमदग्नेस्त्र्यायुषमगस्त्यस्य त्र्यायुषम्
यद्देवानां त्र्यायुषं तन्मे अस्तु शतायुषम्

इति शिरः संमृशति २० परिगृह्य गोमयेन केशानुत्तरपूर्वस्यां गृहस्य मू-ष्यामन्तरा गेहात्पलदं च निदध्यात् । अरिक्ते वा वपने

उप्त्वाय केशान्वरुणाय राज्ञो बृहस्पतिः सविता विष्णुरिन्द्रः
तेभ्यो निधानं महदन्वविन्दन्नन्तरा द्यावापृथिवी अप स्वः

इति २१ कर्त्रे वरं ददाति २२ पद्मगुणं तिलपिशितं च केशवापाय प्र-यच्छति २३ सँवत्सरं माता नाम्लाय धारयेत् । रोषाय नाश्नीयात् । लवणवर्जं तूष्णीम् २४ कन्याया आहुतिवर्जम् २५ विदुषो ब्राह्मणानर्थ-सिद्धिँ वाचयेत् २६ एवमुत्तरेषु २७

इति वाराहगृह्ये चतुर्थं खण्डम्

गर्भाष्टमेषु ब्राह्मणमुपनयेत् । षष्ठे सप्तमे पञ्चमे वा १ ततो गर्भैकादशेषु क्षत्रियं गर्भद्वादशेषु वैश्यम् २ प्राक्षोडशाद्वर्षाद् ब्राह्मणस्यापतिता सावित्री द्वाविँशात्क्षत्रियस्य चतुर्विँशाद्वैश्यस्य । अत ऊर्ध्वं पतितसावित्रिका भ-वन्ति । नैनान्याजयेयुर्नाध्यापयेयुर्न विवहेयुर्ना विवाहयेयुः ३ अभ्यन्तरं जटाकरणं बहिरुपनयनम् ४ उक्तोऽग्निसँस्कारो ब्रह्मणश्च ५ कुमारं पर्यु-प्तिनँ स्नातमभ्यक्तशिरसमुपस्पर्शनकल्पेनोपस्पृष्टमग्नेर्दक्षिणतोऽवस्थाप्य द-धिक्राव्णो अकारिषमिति दध्नः कुमारं त्रिः प्राशयेत् ६

इयं दुरुक्तात्परिबाधमाना वर्णं पवित्रं पुनती न आगात्
प्राणापानाभ्यां बलमाभजन्ती शिवा देवी सुभगा मेखलेयम्

ऋतस्य गोप्त्री तपसस्तरुत्री घ्नती रक्षः सहमाना अरातीः
सा मा समन्तमनुपर्येहि भद्रे धर्तारस्ते सुभगे मेखले मा रिषाम

इति मौञ्जीं त्रिगुणां त्रिः परिवीतां मेखलामाबध्नीते । मौर्वीं धनुर्ज्यां क्षत्रि-

यस्य शार्णीं वैश्यस्य ७ उपवीतमसि यज्ञस्य त्वोपवीतेनोपव्ययामीति यज्ञोपवीतम् ८

या अकृतन्या अतन्वन्या अवायन्या अवाहरन्
याश्चाग्ना देवीरन्तानभितोऽतन्वत तास्त्वा देवीर्जरसे सँव्ययन्ताम्

आयुष्मानयं परिधत्त वासः परिधत्त वर्चः
शतायुषं कृणुहि दीर्घमायुः

शतं च जीव शरदः पुरूचीर्वसूनि चाय्यो विभजाय जीयान्

इत्यहतँ वास आच्छाद्य

मित्रस्य चक्षुर्धरणं बलीयस्तेजो यशस्वि स्थविरं च धृष्णु
अनाहनस्यँ वसनं चरिष्णु परीदँ वाज्यँ वाजिनं दधेऽहम्

इति कृष्णाजिनं च ९ आज्यँ सँस्कृत्य ब्रह्माणमामन्त्र्य समिधमाधायाघा-
रावाघार्याज्यभागौ हुत्वाऽष्टौ जटाकरणीयान्जुहुयात् १० व्याहृतिभिश्च ११
उक्तः कर्मान्तः पूर्वेण १२ कालाय वां गोत्राय वां जैत्राय वामौद्भेत्राय वा-
मन्नाद्याय वामवेनेनिजेदित्युदकेनाञ्जलिं पूरयित्वा सुकृताय वामिति पाणी
प्रक्षाल्य इदमहं कुर्यमन्या निष्प्लावयामीत्याचम्य निष्ठीवति १३ भ्रातृ-
व्याणाँ सपत्नानामहं भूयासमुत्तम इति द्वितीयम् १४

प्रातर्जितं भगमुग्रँ हुवेम वयं पुत्रमदितेर्यो विधर्ता
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीमहीत्याह

इत्यादित्यमुपतिष्ठेत १५ ब्रह्मचर्यमुपागामुप मा ह्वयस्वेति ब्रूयात् १६ एहि
ब्रह्मोपेहि ब्रह्म ब्रह्म त्वा स ब्रह्म सन्तमुपनयाम्यहमसाविति १७ अथा-
स्याभिवादनीयं नाम गृह्णाति १८ देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां

पूष्णो हस्ताभ्याँ हस्तं गृह्णाम्यहमसावित्यस्य हस्तं दक्षिणेन दक्षिणमुत्तानम- भीवाङ्गुष्ठमभीव लोमानि गृह्णीयात् १९

मामेवान्वेतु ते मनो मामेवापि त्वमन्विहि
अग्नौ घृतमिव दीप्यताँ हृदयं तव यन्मयि

इत्येनं प्रेक्षमाणँ समीक्षते २० पृष्ठतोऽस्य पाणिमन्ववहृत्य हृदयदेशमन्वा- रभ्य जपेत्--प्राणानां ग्रन्थिरसि स मा विस्रसदिति । ब्रह्मणो ग्रन्थिरसी- ति नाभिदेशम् २१

गणानां त्वा गणपतिँ हवामहे कविं कवीनामुपमश्रवस्तमम्
ज्येष्ठराजं ब्रह्माणं ब्रह्मणस्पत आ नः कृण्वन्नूतिभिः सईद सादनम्

इति प्रदक्षिणमग्निं परिणयेत् २२ पश्चादग्नेर्दर्भेषूपविशति दक्षिणतश्च ब्रह्म- चारी २३ अधीहि भो इत्युपविश्य जपति २४ प्रभुज्य दक्षिणं जानुं पाणी संधाय दर्भहस्तावोमित्युक्त्वा व्याहृतीः सावित्रीं चानुब्रूयात् । एवं का- ण्डानुवचनेषु २५ तत्सवितुर्वरेण्यमिति गायत्रीं ब्राह्मणाय । आ देवो यातु सविता सुरत्न इति त्रिष्टुभं क्षत्रियाय । युञ्जते मन इति जगतीँ वैश्याय । पच्छोऽर्धर्चशः सर्वामन्ततः २६ पालाशं दण्डं ब्राह्मणाय प्रयच्छति नैयग्रोधं क्षत्रियायाश्वत्थँ वैश्याय । सुश्रुवः सुश्रवसं मां कुरु । यथा त्वँ सुश्रवः सुश्रवा अस्येवमहँ सुश्रवः सुश्रवा भूयासम् । यथा त्वं देवानाँ वेदस्य निधिगोपोऽस्येवमहं मनुष्याणां ब्रह्मणो निधिगोपो भूयासमिति प्रतिगृह्णाति २७ ऊर्ध्वकपालो ब्राह्मणस्य कमण्डलुः परिमण्डलः क्षत्रियस्य निचल्कलो वैश्यस्य

इमा आपः प्रभराम्ययक्ष्मा यक्ष्मचातनीः
ऋृतेनापः प्रभराम्यमृतेन सहायुषा

इति प्रतिगृह्णामीति प्रतिगृह्य भैक्ष्यचर्यं चरेत् -- भवति भिक्षां देहीति ब्राह्मणः भवतिमध्यां क्षत्रियः भवत्यन्त्याँ वैश्यः । चतस्रः षडष्टौ वाऽवि- धवा अप्रत्याख्यायिन्यः । मातरं प्रथममेके २८ गुरवे निवेद्य २९ वा-

ग्यतः प्राग्ग्रामात्संध्यामासेत् । तिष्ठन्पूर्वाम् । सावित्रीं त्रिरधीत्य

अध्वनामध्वपते स्वस्त्यस्याध्वनः पारमशीय
या मेधा अप्सरःसु गन्धर्वेषु च यन्मनः
या मेधा दैवी मानुषी सा मामाविशतामिह

इति ३० प्रत्येत्याग्निं परिचरेत् । इमँ स्तोममर्हत इति परिसमूहेत् । एधोऽस्येधिषीमहीति समिधमादधाति । समिदसि समेधिषीमहीति द्वितीयाम् ३१ अपो अद्यान्वचारिषमित्युपतिष्ठते ३२ तं मा सँसृज वर्चसेति मुखं परिमृजीत ३३

यदग्ने तपसा तपो ब्रह्मचर्यमुपेमसि
प्रियाः श्रुतस्य भूयास्मायुष्मन्तः सुमेधसः

अग्ने समिधमहारिषं बृहते जातवदसे
स मे श्रद्धां च मेधां च जातवदाः प्रयच्छतु । स्वाहा

इति समिधमादधाति ३४ तेजसा मा समङ्ग्धि वर्चसा मा समङ्ग्धि ब्रह्मवर्चसेन मा समङ्ग्धीति मुखं परिमृजीत ३५ आयुर्धा अग्नेऽसीति यथारूपं गात्राणि संमृशति ३६ इह धृतिरिति पर्यायैरँसं ग्रीवाश्चार्चिरालभ्य रुचं नो धेहीति ललाटमभिमृशेत् ३७ आद्यन्तयोः पर्युक्षणम् ३८ गुरवे ब्रह्मणे च वरमुत्तरासङ्गं च ददाति ३९ द्वादशरात्रमक्षारलवणमाशेत् ४० अक्षारमेके ४१ व्युष्टे द्वादशरात्रे षड्रात्रे वा ग्रामात्प्राचीँ वोदीचीँ वा दिशमुपनिष्क्रम्य पश्चात्पलाशस्य यज्ञीयस्य वा वृक्षस्य सावित्रेण स्थालीपाकेनेष्ट्वा जयप्रभृतिभिश्चाज्यस्य पुरस्तात्स्विष्टकृतो मेखलां दण्डं चाप्सु प्रास्येत् ४२ तत्रैव हविश्शेषं भुञ्जीतेति श्रुतिः ४३

इति वाराहगृह्ये पञ्चमं खण्डम्

उपनयनप्रभृति व्रतचारी स्यात् १ उपनयनेन व्रतादेशा व्याख्याताः २ मार्गवासाः सँहतकेशः भैक्षाचर्यवृत्तिः सशल्कदण्डः सप्तमौञ्जीं मेखलां

धारयेद् आचार्यस्याप्रतिकूलः सर्वकारी ३ यदेनमुपेयात्तदस्मै दद्यात् । बहूनाँ येन संयुक्तः ४ नास्य शय्यामाविशेत् ५ न रथमारोहेत् ६ न सँवसेत् ७ न विहारार्थो जल्पेत् ८ न रुच्यर्थः कञ्चनं धारयेत् ९ सर्वाणि साँस्पर्शकानि स्त्रीभ्यो वर्जयेत् १० न स्नायाद्दण्डवत् ११ नोदकमभ्युपेयात् १२ न दिवा स्वपेत् १३ त्रैविद्यकं ब्रह्मचर्यं चरेत् १४ इन्द्रियसँयतः सायं प्रातर्भैक्षयवृत्तिः १५ सायं प्रातरग्निं परिचरेत् १६ अधश्शायी आचार्याधीनवृत्तिः तन्निसर्गादशनम् अयाचितं लवणम् १७ वाग्यतोऽश्नीयात् १८ मधुमाँसे वर्जयेत् १९ अच्छन्नवस्त्राँ विवृताँ स्त्रियं न पश्येत् २० यौप्यस्य वृक्षस्य दण्डी स्यात् २१ नानेन प्रहरेद्भवे न ब्राह्मणाय २२ न नृत्यगीते गच्छेत् २३ न चैने कुर्यात् २४ नावलिखेत् २५ शिखाजटः सर्वजटो वा स्यात् २६ शाणीक्षौमाजिनवासाः २७ रक्तँ वसनकम्बलम्--एणेयं ब्राह्मणस्य रौरवं क्षत्रियस्य आजँ वैश्यस्य २८ एतेन धर्मेण द्वादशवर्षाण्येकवेदे ब्रह्मचर्यं चरेत् । चतुर्विँशति द्वयोः षट्त्रिँशति त्रयाणाम् अष्टाचत्वारिँशति सर्वेषाम् । यावद् ग्रहणँ वा २९ मलजुरबलः कृशः स्नात्वा स सर्वं लभते यत्किञ्चिन्म-नसेप्सितमिति ३० एतेन धर्मेण साध्वधीते ३१ मन्त्रब्राह्मणान्यधीत्य कल्पं मीमाँसां च याज्ञिकोऽधीत्य वक्त्रं पदँ स्मृतिं चैच्छिकः ३२ तौ स्नातकौ ३३ श्रोत्रियोऽन्यो वेदपाठी । न तस्य स्नानम् ३४ उपविश्याचमनँ विधीयते । अन्तर्जानु बाहू कृत्वा त्रिराचामेत् ३५ द्विः परिमृजेत् खानि चोपस्पृशे-च्छीर्षण्यानि ३६

इति वाराहगृह्ये षष्ठं खण्डम्

अथ चातुर्होतृकी दीक्षा सँवत्सरम् १ आघारावाघार्याज्यभागौ हुत्वा चतु-र्होतृन्स्वकर्मणो जुहुयात् । सह पञ्चहोत्रा षड्ढोत्रा च सप्तहोतारमन्ततः २ हुत्वा व्रतं प्रदायादितो द्वावनुवाकावनुवाचयेत् ३ अथाग्निव्रताश्वमेधिकी दीक्षा सँवत्सरं द्वादशरात्रँ वा ४ आकूतमग्निमिति षड्हुत्वा व्रतं प्रदायादि-तोऽष्टावनुवाकाननुवाचयेत् ५ त्रिषवणमुदकमाहरेत्त्रीँस्त्रीन्कुम्भान् ६ त्रीँश्च समित्पुलान् ७ भस्मनि शयीत करीषे सिकतासु भूमौ वा ८ नोद-कमभ्युपेयात् ९ सँवत्सरे समाप्ते घृतवतापूपेनाग्निमिष्ट्वा वात्सप्रँ वाचयेत् १० स्मार्तेन यावदध्ययनं काण्डव्रतविशेषा होमार्थश्चाद्यन्तयोर्जुहुयात् ११ अथैनं परिददीत--अग्नये त्वा परिददानि । वायवे त्वा परिददानि । सूर्याय त्वा

परिददानि । प्रजापतये त्वा परिददानीति १२ एतेनैवाश्वमेधो व्याख्यातः १३ नवमेनानुवाकेन हुत्वा दशमेनोपतिष्ठेत १४ अश्वाय घा-समुदकस्थानमुदकं चाभ्युपेयात् १५ एताभ्यामेव मन्त्राभ्यां त्रैविद्यकँ व्रत-मुपेयात् १६ रहस्यमध्येष्यता प्रवर्ग्यः १७ तस्य रहस्ये व्रतोपायनँ समि-न्मन्त्रश्च १८ तिष्ठेदहनि रात्रावासीत वाग्यतः १९ पर्वसु चैवँ स्यात् २० सर्वजटश्च स्यात् २१ सँवत्सरावरः प्रवर्ग्यो भवति २२

इति वाराहगृह्ये सप्तमं खण्डम्

वर्षासु श्रवणेनाध्यायानुपाकरोति । हस्तेन वा । प्रौष्ठपदीमित्येके १ अथ जुहोति--

अप्वा नामासि तस्यास्ते जोष्ट्रीं गमेयम्
अहमिद्धि पितुः परि मेधा अमृतस्य जग्रभ । अहँ सूर्य इवाजनि स्वाहा

अप्वो नामासि तस्य ते जोष्ट्रं गमेयम्
अहमिद्धि पितुः परि मेधा अमृतस्य जग्रभ । अहँ सूर्य इवाजनि स्वाहा

इति २ युक्तिर्नामासि । योगो नामासि । मतिर्नामासि । सुमतिर्ना-मासि । सरस्वती नामासि । सरस्वान्नामासि । तस्यास्ते जोष्ट्रीं गमेयं तस्य ते जोष्ट्रीं गमेयं इत्यनुषजेत् ३ यजे स्वाहा । प्रयुजे स्वाहा । सँयुजे स्वाहा । उद्युजे स्वाहा । उद्युज्यमानाय स्वाहेति जयप्रभृतिभि-श्चाज्यस्य पुरस्तात्स्विष्टकृतोऽन्तेवासिनाँ योगमिच्छन्नथ जपति--

ऋतँ वदिष्यामि सत्यँ वदिष्यामि ब्रह्म वदिष्यामि
तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारम्

वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरायुर्मयि धेहि
वेदस्य वाणी स्थ

उपतिष्ठन्तु छन्दाँस्युपाकुर्महेऽध्यायान् ४ ओं भूर्बुवः स्वरिति दर्भपाणिस्त्रिः सावित्रीमधीत्यादितश्च त्रीननुवाकाँस्तथाङ्गानामेकैकम् । को वो युनक्तीति

च ५ तस्यानध्यायाः । समूहन्वातः वलीकक्षारप्रभृति वर्षं न विद्योतमाने न स्नयतीति श्रुतिः आकालिकं देवतुमूलँ विद्युद्धन्वोल्काऽत्यक्षराः शब्दाः आचारेणान्ये ६ अर्धपञ्चमान्मासानधीत्य पञ्चार्धषष्ठान्वा दक्षिणायनँ वाऽधीत्याथोत्सृजन्त्येतेन धर्मेण--

ऋतमवादिषँ सत्यमवादिषं ब्रह्मावादिषं
तन्मामावीत्तद्वक्तारमावीदावीन्मामावीद्वक्तारम्

वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरायुर्मयि धेहि
वेदस्य वाणी स्थ

प्रतिश्वसन्तु छन्दाँस्युत्सृजामहेऽध्यायान् ७ ओं भूर्भुवः स्वरित्यन्तमधीत्य को वो विमुञ्चतीति च ८ पक्षिणीँ रात्रीं नाधीयीत । उभयतःपक्षाँ वा ९ नात ऊर्ध्वमभ्रेषु १० आकालिकविद्युत्स्तनयित्नुवर्षँ वर्षं च ११ अथोपनिषदर्हाः । ब्रह्मचारी सुचरिती मेधावी कर्मकृद्धनदः प्रियः विद्यया वा विद्यामन्विच्छन् १२ तानि तीर्थानि ब्रह्मणः १३

इति वाराहगृह्येऽष्टमं खण्डम्

षोडशवर्षस्य गोदानम् । अग्निँ वाऽध्येष्यमाणस्य । अग्निगोदानो मैत्रायणिः १ जटाकरणेनोक्तो मन्त्रविधिः २ उपस्थ उपकक्षयोश्चाधिको मन्त्रप्रयोगः

यत्क्षुरेण पर्चयता सुपेशसा वप्तर्वपसि केशश्मश्रून्
शुन्ध शिरो मुखं मास्यायुः प्रमोषीः

इति ३ भूमौ केशान्निखनेत् ४ अन्ते गां दद्यात् ५ वेदे गुरुणाऽनुज्ञातः स्नायात् ६ छन्दस्यर्थान्बुद्ध्वा स्नास्यन्गां कारयेत् ७ आचार्यमर्हयेत् ८ आपो हि ष्ठेति तिसृभिः हिरण्यवर्णाः शुचय इति चतसृभिः स्नात्वाऽहते वाससी परिदधीत--वस्वसि वसुमन्तं मां कुरु सौवर्चसाय वां तेजसे ब्रह्मवर्चसाय परिदधानीति ९ विश्वजनस्य छायासीति छत्रं धारयते १०

मालामाबध्नीते--

यामश्विनौ धारयेतां बृहतीं पुष्करस्त्रजम्
ता ँ विश्वैर्देवैरनुमतां मालामारोपयामि

इति ११ तेजोऽसीति हिरण्यं बिभृयात् १२ प्रतिष्ठे स्थो देवते मा मा सं-तांप्तमित्युपानहौ १३ विष्टम्भोऽसीति धारयेद्वैणवीँ यष्टिम् १४ सोदकं च कमण्डलुम् १५ नित्यव्रतान्याहुराचार्याः १६ द्विवस्त्रोऽत ऊर्ध्वम् । शोभनँ वासो भर्तव्यमिति श्रुतिः १७ आमन्त्र्य गुरूनगुर्वधीनाँश्च स्वान्गृहान्व्रजेत् १८ प्रतिषिद्धमपरया द्वारा निस्सरणं मलवद्वाससा सह संभाषा रजस्वद्वाससा सह शय्या गोर्गुरोर्दुरुक्तवचनमस्थाने शयनँ स्थानँ स्मयनँ यानं गानँ स्मरणमिति । तानि वर्जयेत् १९ याजनँ वृत्तिः । उञ्छँ शिलमयाचितप्रतिग्रहः साधुभ्यो वा याचितम् । असँसिध्यमानायाँवा वैश्यवृत्तिः २० स्वाध्यायविरोधि-नोऽर्थानुत्सृजेत् २१

इति वाराहगृह्ये नवमं खण्डम्

विनीतक्रोधः सहर्षः सहर्पीं भार्या ँ विन्देतानन्यपूर्वा ँ यवीयसीम् १ अस-मानप्रवरैर्विवाहः । ऊर्ध्व ँ सप्तमात्पितृबन्धुभ्यः पञ्चमान्मातृबन्धुभ्यो बी-जिनश्च २ कृत्तिकास्वातिपूर्वैरिति वरयेत् ३ मृगशिरःश्रविष्ठोत्तराणीत्यु-पयमेत् ४ पञ्च विवाहकारकाणि भवन्ति--वित्तँ रूपँ विद्या प्रज्ञा बान्ध-वमिति ५ एकालाभे वित्तँ विसृजेत् । द्वितीयालाभे रूपम् । तृतीया-लाभे विद्याम् । प्रज्ञायां तु बान्धवे च विवदन्ते ६

अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्तु नो वरेयम्
समर्यमा सं भगो नोऽनुनीयात्सं जास्पत्यँ सुयममस्तु देवाः

इति वरकान्व्रजतोऽनुमन्त्रयते ७ बन्धुमतीं कन्यामस्पृष्टमैथुनामुपयच्छे-तानग्निकाँ श्रेष्ठाम् ८ विज्ञानमस्यै कुर्यात् । चतुरो लोष्टानाहरेत्--सी-तालोष्टँ वेदिलोष्टं गोमयलोष्टँ श्मशानलोष्टं च ९ तेषामेकं गृह्णीष्वेति ब्रू-यात् । श्मशानलोष्टं चेद्गृह्णीयान्नोपयच्छेत १० असँस्पृष्टां धर्मेणोपय-च्छेत ब्राह्मेण शौल्केन वा ११ शतमितिरथं दद्याद् गोमिथुनँ वा १२

उभयाँस्तेजनीष्वासजेज्जन्यान्कौमारिकाँश्च । पूर्वे जन्याःस्युरपरे कौमारि-काः १३ चतुरो गोमयपिण्डान्कृत्वा द्वावन्येभ्यस्तथान्येभ्य इति प्रयच्छेत् १४ धनं न इति ब्रूयुः । पुत्रपशवो न इति जन्याः १५ ददानि । प्रतिगृह्णानीति त्रिर्ब्रह्मदेयाम् १६ कृतेनाँसेन विसंकसेयुः १७ त्रिरानन्दं मागधो ह्वयेत् १८

इति वाराहगृह्ये दशमं खण्डम्

षडर्घ्यार्हा भवन्ति--ऋत्विगाचार्यो विवाह्यो राजा स्नातकः प्रियश्चेति १ अप्राकरणिकान्ना परिसँवत्सरादर्हयन्ति । अन्यत्र याज्यात्कर्मणो विवाहाच्च २ न जीवपितृकोऽर्घ्यं प्रतिगृह्णीयात् ३ अथैनमर्हयन्ति ४ काँस्ये चमसे वा दधनि मध्वासिच्य वर्षीयसाऽपिधाय विराजो दोहोऽसि विराजो दोहोऽसि विराजो दोहमशीय मयि दोहः पद्यायै विराज इति मधुपर्कमाहियमाणं प्रतीक्षते ५ सावित्रेण विष्टरौ प्रतिगृह्यराष्ट्रभृदसीत्यासन्द्यामुदगग्रमास्तृणाति ६

अहँ वर्ष्म सदृशानामुद्यतानामिव सूर्यः
इदमहं तमधरं करोमि यो मा कश्चाभिदासति

इत्येकस्मिन्नुपविशति ७ मा त्वद्योषमित्यन्यतरमधस्तात्पादयोरुपकर्षति ८ विष्टर आसीनायैकैकं त्रिः प्राह ९ नैव भो इत्याह । न मा रिषामेति १० आचमनीयाः प्रथमाः प्रतिपद्यन्ते ११ अमृतोपस्तरणमसीत्याचामति १२ पद्येन पादौ प्रक्षालयति १३ स्पृशत्यर्धम् १४ ततः प्रणयति १५ सावित्रेणोभयतोविष्टरं मधुपर्कं प्रतिगृह्य--अदित्यास्त्वा पृष्ठे सादयामीति भूमौ प्रतिष्ठाप्यावसाय्य सुपर्णस्य त्वा गरुत्मतश्चक्षुषाऽवेक्ष इत्यवेक्ष्य नमो रुद्राय पात्रसद इति प्रादेशेन प्रतिदिशँ व्युद्दिश्याङ्गुष्ठेनोपमध्यमया च मधु वाता ऋतायत इति तिसृभिः सँसृजति १६ सत्यँ यशः श्रीर्मयि श्रीः श्रयतामिति त्रिः प्राश्नाति भूयिष्ठम् १७ सुहृदेऽवशिष्टं प्रयच्छति १८ अमृ-तापिधानमसीत्याचामति १९ असिविष्टरपाणिर्गां प्राह २० हतो मे पाप्मा पाप्मानं मे हत । यां त्वा देवा वसवोऽन्वजीविषुरादित्यानाँ स्वसारँ रु-द्रमातरम् । दैवीं गामदितिं जनानामारभन्तामर्हतामर्हणाय । ओं कुरुतेति संप्रेष्यति २१ चतुरवरान्ब्राह्मणान्नानागोत्रानित्यैकैकं पश्वङ्गं पायसँ वा भोजयेत् २२ यद्युत्सृजेत्--

माता रुद्राणां दुहिता वसूनाँ स्वसादित्यानाममृतस्य नाभिः
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिँ वधिष्ट

ओमुत्सृजत तृणान्यत्तूदकं पिबतु । इत्युक्ते पशुमालभन्ते २३ शं नो मित्र इति पाणी प्रक्षाल्य यथार्थम् २४

इति वाराहगृह्ये एकादशं खण्डम्

अथालंकरणम्--अलंकरणमसि सर्वस्मा अलं भूयासम् १ प्राणापानौ मे तर्पयामि समानव्यानौ मे तर्पयाम्युदानरूपे मे तर्पयामि चक्षुःश्रोत्रे मे तर्पयामि सुचक्षा अहमक्षिभ्यां भूयासँ सुवर्चा मुखेन सुश्रुत्कर्णाभ्यामिति गन्धाच्छादने २

परिधास्ये यशो धास्ये दीर्घायुत्वाय जरदष्टिरस्मि
शतं च जीव शरदः पुरूचीर्वसूनि चाय्यो विभजाय जीयाम्

इत्यहतँ वास आछाद्याग्निं प्रज्वाल्य व्याहृतिभिर्व्रीहियवान्हुत्वा मङ्गलान्याशासेत् ३

इति वाराहगृह्ये द्वादशं खण्डम्

अथ प्रवदने कन्यामुपवसिताँ स्नाताँ सशिरस्कामहतेनाछिन्नदशेन वाससा सँवीताँ सँस्तीर्णस्य पुरस्ताद्विहितानि वादित्राणि विधिवदुपकल्प्य पुरस्तात्स्विष्टकृतो वाचे पथ्यायै पूष्णे पृथिव्या अग्नये सेनायै धेनायै गायत्र्यै त्रिष्टुभे जगत्या अनुष्टुभे पङ्क्त्ये विराजे राकायै सिनीवाल्यै कुह्वै त्वष्ट्र आशायै संपत्त्यै भूत्यै निर्ऋत्या अनुमत्यै पर्जन्यायाग्नये स्विष्टकृते च जुहुयात् १ आज्यशेषेण पाणी प्रलिप्य कन्याया मुखँ संमार्ष्टि--

प्रियां करोमि पतये देवराणाँ श्वसुराय च
रुच्यै त्वाग्निः सँसृजतु रुचिष्या पतये भव

सौभाग्येन त्वा सँसृजत्विळा देवी घृतपदीन्द्राण्यग्नाय्यश्विनी राट्

वागिळा द्यौररुन्धती

इति च २ सर्वाणि वादित्राणयभिमन्त्रयते--

या चतुर्धा प्रवदत्यग्नौ या वाते या बृहत्युत
पशूनाँ यां ब्राह्मणे न्यदधुः शिवा सा प्रवदत्विह

इति ३ सर्वाणि वादित्राणयलंकृत्य कन्या प्रवादयते--

शुभँ वद दुन्दुभे सुप्रजास्त्वाय गोमुख
प्रक्रीडन्तु कन्याः सुमनस्यमानाः सहेन्द्राणया सवयसः सनीडाः

प्रजापतिर्यो वसति प्रजासु प्रजास्तन्वते सुमनस्यमानाः
स इमाः प्रजा रमयतु प्रजात्यै स्वयं च नो रमताँ शं दधानः

इति ४ प्रवदन्ति कारालिकानि ५ कन्यामुदकेनामिषिञ्चेत् ६
इति वाराहगृह्ये त्रयोदशं खणडम्

खे रथस्य खेऽनसः खे युगस्य शतक्रतोः
अबालामिन्द्रस्त्रिः पूर्त्यकृणोत्सूर्यवर्चसः

इत्यथास्या अहतँ वासः प्रयच्छति १ अथैनां दर्भशुल्वेन संनह्यति--

सं त्वा नह्यामि पयसा पृथिव्याः सं त्वा नह्याम्यद्भिरोषधीभिः
सं त्वा नह्यामि प्रजया धनेन सह संनद्धा सुनुहि भागधेयम्

इति २ अथैनाँ वाससोऽन्तं ग्राहयित्वाऽभ्युदानयति --
अघोरचक्षुरपतिघ्न्येधि

एहि शिवा पशुभ्यः सुमनाः सुवर्चाः
दीर्घायुपत्नी प्रजया स्वर्विदिन्द्रप्रणयीरुप नो वस्तुमेहि

इति ३ समूहनोल्लेपनोद्धननावेक्षणमित्यग्निकाले भूमिसँस्कारान्सर्वत्र यथानिमित्तम् ४ पश्चादग्नेः कटे तेजन्याँ वा दर्भेष्वासनम् ५ शुचौ भूमिप्रदेशे शमीशमकश्यामाकानां प्रियङ्गुदूर्वागौरसर्षपाणाँ यथालाभगन्धसक्षीरफलवद्भ्यो वनस्पतिभ्यो हरित्पर्णकुशयवादिभिश्चान्नैर्या ओषधयः । समन्या यन्तीत्यनुवाकेन शं नो देवीरिति च सहिरण्यापोऽभिमन्त्र्य प्रणीतोदकुम्भं प्रणयेत् ६ तं लाजाहुतीषु हूयमानासु भ्राता ब्रह्मचारी वोदृह्य धारयेद् दक्षिणतश्च ७ लाजान्सँस्कृतान्शमीपर्णमिश्रान्शूर्पेण दक्षिणतो माताऽन्या वाऽविधवा ८ आज्यँ सँस्कृत्य ब्रह्माणमामन्त्र्य समिधमाधायाघारावाघार्याज्यभागौ हुत्वा ९ अथ जुहोति--

अग्नये जनविदे स्वाहा
सोमाय जनविदे स्वाहा
गन्धर्वाय जनविदे स्वाहा
सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः
तृतीयोऽग्निष्टे पतिस्तुर्योऽहं मनुष्यजाः । स्वाहा

सोमोऽददद्गन्धर्वाय गन्धर्वोऽददग्नये
रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम्

इति १० हिरण्यगर्भ इत्यष्टाभिः प्रत्यृचमाज्याहुतीर्जुहुयात् ११ येन कर्मणेत्सेत्तत्र जयाञ्जुहुयादिति जयानाँ श्रुतिः । त्वा यथोक्तम् । आकूत्यै त्वा स्वाहा । भूत्यै त्वा स्वाहा । कामायै त्वा स्वाहा । रक्षायै त्वा स्वाहा । समृधे त्वा स्वाहा । समृद्ध्यै त्वा स्वाहा । ऋचा स्तोमम् । प्रजापतये । भूः स्वाहा । अयाश्चाग्नेऽसीति च १२ उत्तरतोऽग्नेर्दर्भेषु प्राचीं कन्यामवस्थाप्य पुरस्तात्प्रत्यङ्मुख उपयन्ता देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याँ हस्तं गृह्णाम्यहमसावित्यथास्या उपनयनवद्धस्तं गृह्णाति नीचारिक्तमरिक्तेन--

गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासत्
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः

ऊर्ध्वा वाक्समभवत्पुरा देवासुरेभ्यः
यां त्वा विश्वस्य भूतस्य प्रागायाम्यस्या अग्रतः

सरस्वति प्रेदमव सुभगे वाजिनीवति
येन भूतँ समभवद्येन विश्वमिदं जगत्
तामद्य गाथां गास्यामो या स्त्रीणामुत्तमं मनः

सा त्वमस्यमोऽहममोऽहमस्मि सा त्वम्
द्यौरहं पृथिवी त्वं बृहदहँ रथन्तरं त्वम् । रेतोऽहमस्मि रेतोधृक्त्वम्

सामाहमस्मि ऋक्त्वं मनोऽहमस्मि वाक्त्वम्
सा मामनुव्रता भव सा मामनुप्रजायस्व

प्रजाँ सृजावहा उभौ पुँसे पुत्राय कर्तवे
श्रियै पुत्राय वेथवेह सूनृते

इति १३ प्रदक्षिणमग्निं परिणयेत् १४ पश्चादग्नेर्दर्भेष्वश्मानमवस्थापयति --

आतिष्ठेममश्मानमश्मेव त्वँ स्थिरा भव
कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतम्

इति १५ अत्रैवास्या द्वितीयँ वासः प्रयच्छति १६ उपर्यग्नावञ्जलौ लाजा-न्भ्राता ब्रह्मचारी वोपस्तीर्ण आवपेत् १७ तानभिघारितानविच्छिन्दती जु-हुयात् । कर्तानुमन्त्रयेत--

इयं नार्युपब्रूते लाजानावपन्तिका
दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम

अर्यमणं नु देवं कन्याग्निमयक्षत
सोऽस्मान्देवोऽर्यमा प्रेतो मुञ्चातु मामुत । स्वाहा

इति १८ वीरसूर्जीवपत्नीर्भूयासमिति सर्वत्र वाचयेत् १९

तुभ्यमग्रे पर्यणयँ सूर्याँ वहतुना सह
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह
इति द्वितीयं परिणयेत् २० एवमेव तृतीयम् । अवस्थापनप्रभृति समानम् । पूषणं न देवम् । वरुणं नु देवमिति होमौ । कन्याग्निमयक्षतेति समानम् २१ कामेन चतुर्थीं पूरयित्वा द्विरभिघार्योत्तरार्धपूर्वार्धे जुहुयात् २२ अथैनां प्राचीँ सप्त पदानि प्रक्रमयति--एकमिषे विष्णुस्त्वां नयतु । द्वे ऊर्जे । त्रीणि रायस्पोषाय । चत्वारि मायोभवाय । पञ्च प्रजाभ्यः । षडृतुभ्यः । सप्त सप्तभ्यो होत्राभ्यः । विष्णुस्त्वां नयत्विति द्वितीयप्रभृत्यनुषजेत् । सखी सप्तपदी भव सख्यं ते गमेयँ सख्यात्ते मा रिषमिति सप्तम एनां प्रेक्षमाणाँ समीक्षते २३

प्र त्वा मुञ्चातु वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवः
धातुश्च योनौ सुकृतस्य लोके हृष्टा सँ सह पत्या भूयासम्

इति शुल्वँ विस्रँस्योदकुम्भेन मार्जयन्ते--पुनन्तु मा पितर इत्यनुवाकेन । आपोहिष्ठीयेनेत्येके २४

सुमङ्गलीरियँ वधुरिमाँ समेत्य पश्यत
सौभाग्यमस्यै दत्त्वा यथार्थँ विपरेतन

इति २५ स्थालीपाकेन शेषो व्याख्यातः २६ पृथक्त्वेत् । येन द्यौरुग्रेत्येवंप्रभृतय उद्वाहे होमाः स्युः । नापाणिग्रहणे लाजाः । समानं प्रक्रमणं मार्जनं च २७

इति वाराहगृह्ये चतुर्दशं खण्डम्

अङ्कौ न्यङ्कावभितो रथँ ये ध्वान्ता वाता अग्रमभि ये संपतन्ति
दूरेहेतिः पतत्री वाजिनीवाँस्ते नोऽग्नयः पप्रयः पारयन्तु

इति चक्रमभिमन्त्रयते १

सुकिँशुकँ शल्मलिँ विश्वरूपँ हिरण्यवर्णँ सुधुरँ सुचक्रम्
आरोह सूर्ये अमृतस्य पन्थाँस्तेन याहि गृहान्स्वस्ति

इत्यारोपयेत् २

उप मायन्तु देवता उप ब्रह्म सुवीर्यम्
उप क्षत्रं च यद्बलमुप मामैतु यद्बलम्

इति प्रयास्यन्जपति ३

अनु मायन्तु देवता अनु ब्रह्म सुवीर्यम्
अनु क्षत्रं च यद्यशमनु मामैतु यद्यशम्

इति प्राञ्चं प्रयाप्य प्रदक्षिणमावृत्य यथार्थलक्षण्यँ वृक्षं चैत्यँ वोपतिष्ठेत ४ नमो रुद्रायैकवृक्षसद इत्येकवृक्षे जपति । ये वृक्षेषु शष्पिञ्जरा इति च ५ नमो रुद्राय चतुष्पथसद इति चतुष्पथे । ये पथां पथिरक्षय इति च ६ नमो रुद्राय श्मशानसद इति श्मशाने । ये भूतानामधिपतय इति च ७ नमो रुद्राय पात्रसद इति पिबन् । ये अन्नेषु विविध्यन्तीति च ८

ये तीर्थानीति तीर्थे ९ यत्रापस्तरितव्या आसीदति--

समुद्राय वयुनाय सिन्धूनां पतये नमः
नदीनाँ सर्वासां पित्वे जुहुता विश्वकर्मणे
विश्वहादाभ्यँ हविः

इत्यप्सूदकाञ्जलीर्जुहुयात् १० यावताँ सखायानँ स्वस्तिमिच्छेत्तावत उदकाञ्जलीर्जुहुयात्--अमृतमास्ये जुहोम्यायुः प्राणे प्रतिदधामि । अमृतं ब्रह्मणा सह मृत्युं तरेम । प्रासहादितीष्टिरस्यदितिरेव मृत्युन्धयमिति त्रिराचामेत् ११ द्विः परिमृजेत् १२ यद्यक्षा शम्याणिर्वा रिष्येत तत्रैवाग्निमुपसमाधायाग्नेयेन स्थालीपाकेनेष्ट्वा जयप्रभृतिभिश्चाज्यस्य पुस्तात्स्विष्टकृतः १३ अपरस्याह्नः संधिकाले गृहान्प्रपादयेत् १४ रथाद्यौपासनात्संततामुलपराजीँ

स्तृणाति १५ तयाभ्युपैति १६

गृहानहँ सुमनसः प्रपद्येऽवीरघ्नी वीरवतः सुशेवा
इराँ वहन्ती घृतमुक्षमाणाँस्तेष्वहँ सुमनाः सँविशामि

इत्यभ्याहिताग्निँ सोदकँ सौषधमावसथं प्रपद्येत । रेवत्या रोहिण्या यद्वा पुण्योक्तम् १७ आनडुहे चर्मण्युपविश्य १८ अथास्या ब्रह्मचारिणं जीवपितृकं जीवमातृकमुत्सङ्गमुपवेशयेत् १९ फलानामञ्जलिं पूरयेत्तिलतण्डुलानाँ वा २० अच्युता ध्रुवा ध्रुवपत्नी ध्रुवं पश्येम विश्वत इति ध्रुवं जीवन्तीँ सप्तर्षीनरुन्धतीमिति दर्शयित्वा प्राजापत्येन स्थालीपाकेनेष्ट्वा जयप्रभृतिभिश्चाज्यस्य पुरस्तात्स्विष्टकृत आज्यशेषे दध्यासिच्य दधिक्राव्णो अकारिषमिति दध्नः पुमाँस्त्रिः प्राश्नाति २१

चक्रमिवानडुहः पदं मामेवान्वेतु ते मनः
मां च पश्यसि सूर्यं च मा चान्येषु मनस्कृथाः

चाक्रवाकँ सँवसनं तन्नौ सँवननं कृतम्

इत्यवशिष्टं जायायै प्रयच्छति २२ तूष्णीँ सा प्राश्नाति २३ सँवत्सरं मुदा तौ ब्रह्मचर्यं चरतः । द्वादशरात्रं त्रिरात्रमेकरात्रँ वा २४ एवमेव चतुर्थ्यां कृत्वा हिरण्यगर्भ इत्यष्टाभिः स्थालीपाकस्य हुत्वा जयप्रभृतिभिश्चाज्यस्य पुरस्तात्स्विष्टकृतः २५ अथास्याः सव्येँऽसे पूषा ते ग्रन्थिं ग्रथ्नात्विति वाससो ग्रन्थिं क्रियमाणमनुमन्त्रयते २६ चतस्रोऽविधवाः कुर्वन्ति । ताभ्यो हिरण्यं ददाति २७ सँवत्सरं न प्रवसेत् । द्वादशरात्रं तिरात्रमेकरात्रँ वा २८

इति वाराहगृह्ये पञ्चदशं खण्डम्

तौ संनिपातयतः ।

अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसोऽभिभूतम्
इह प्रजामिह रयिँ रराणः प्रजायस्व प्रजया पुत्रकाम

अपश्यं त्वा मनसा दीध्यानाँ स्वायां तनूँ ऋत्विये नाधमानाम्
उप मामुच्चा युवतिर्बभूयात्प्रजायस्व प्रजया पुत्रकामे

प्रजापते तन्वं मे जुषस्व त्वष्टा वीरैः सहसाहमिन्द्रः
इन्द्रेण देवैर्वीरुधः सँव्ययन्तां बहूनां पुँसां पितरौ स्याव

अहं प्रजा अजनयं पृथिव्यामहं गर्भमदधामोषधीषु
अहँ विश्वेषु भुवनेष्वन्तरहं प्रजाभ्यो बिभर्षि पुत्रान्

इति स्त्र्यादिव्यत्यासं जपतः १ करदिति भसदभिमृशेत् २ जनदित्युपरि-जननम् ३ बृहदिति जातः प्रतिष्ठितम् ४ अथास्यास्तृतीये गर्भमासे पुँसा नक्षत्रेण यदहश्चन्द्रमा न दृश्येत तदहर्वोपोष्याप्लाव्याहतँ वास आछाद्य न्य-ग्रोधावरोहशुङ्गान्युदपेषं पिष्ट्वा दक्षिणस्मिन्नासिकाच्छिद्र आसिञ्चेत्--हिर-ण्यगर्भः । अद्भ्यः संभृत इत्येताभ्याम् ५ अथास्या दक्षिणं कुक्षिमभिमृ-शेत्--

पुमानग्निः पुमानिन्द्रः पुमान्देवो बृहस्पतिः
पुमानग्निश्च वायुश्च पुमान्गर्भस्तवोदरे

पुमाँसौ मित्रावरुणौ पुमाँसावश्विनावुभौ
पुमाँसं गर्भं जायस्व त्वं पुमाननुजायताम्

इत्येताभ्याम् ६ अथास्याः पञ्चमे षष्ठे सप्तमे वा गर्भमासे मङ्गल्यैः स्नाप-यित्वा प्राजापत्येन स्थालीपाकेनेष्ट्वा जयप्रभृतिभिश्चाज्यस्य पुरस्तात्स्विष्ट-कृतः । पश्चादग्नेर्दर्भेष्वासीनायाः सर्वान्केशान्विप्रमुच्य

त्वमर्यमा भवसि यत्कनीनां देवः स्वधावो गुह्यं बिभर्षि
अञ्जन्ति विप्रँ सुकृतं न गोभिर्यद्दम्पती सुमनसा कृणोषि

इति नवनीतेन पाणी प्रलिप्य सर्वान्केशान्संप्रयौति ७ इन्द्राणी चक्रे कङ्कतँ स सीमन्तँ विसर्पतु इति कङ्कतं गृह्णाति ८ पुनः पत्नीमग्निरिति केशप्रसाधनं

कुर्यात् ९ शलल्या शमीशाखया सपलाशया--

अन्तर्वती पुमाँसं दीर्घं जीवन्तँ शतायुषम्
दीर्घायुरस्या यः पतिर्जीवातु शरदः शतम्

इति त्रिश्वेतया सीमन्तं करोति १० अथास्याः पतिर्द्वेधा केशान्बध्नाति--नीललोहितेन सूत्रेण जीवोर्णया वा ११

इति वाराहगृह्ये षोडशं खण्डम्

अथ वैश्वदेवँ व्याख्यास्यामः १ तत्र सायंप्रातःप्रभृतीनामग्निहोत्रवत्परिसमुह्य परिस्तीर्य पर्युक्ष्य सायं प्रातः स्यादित्येके २ हविष्यस्य वा सिद्धस्य वैश्वदेवः ३ अग्नये सोमाय प्रजापतये धन्वन्तरये वास्तोष्पतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृते च जुहुयात् ४ अवशिष्टस्य बलिँ हरेत् ५ दधिमधुमिश्रस्याग्नये पुरस्ताद्यमाय दक्षिणतः सोमाय पश्चाद्वरुणायोत्तरतः मध्ये वरुणार्यमभ्यां ब्रह्मणे च । अग्नये पृथिव्यै वायवेऽन्तरिक्षाय सूर्याय दिवे चन्द्रमसे नक्षत्रेभ्य इति ६ अद्भ्यः कुम्भदेशे ७ ओषधिवनस्पतिभ्यो मध्यदेशे ८ कामाय । गृहपतय इति शय्यादेशे ९ श्रियै च १० रक्षोजनेभ्योऽन्तः शरणे ११ आकाशायेति स्थलिकाण्डाभ्याम् १२ तूष्णीं निष्क्रम्योपरि शरणे १३ कव्यं प्राच्याम् १४ पितृभ्यः स्वधेत्यनुषजेत् १५ नम इत्यन्ते च १६ ये ब्राह्मणाः प्राच्यां दिश्यर्हन्तु । ये देवा यानि भूतानि प्रपद्ये तानि मे स्वस्त्ययनं कुर्वन्त्विति । दक्षिणस्याम् । प्रतीच्याम् । उत्तरस्याम् । ऊर्ध्वायाम् । ये ब्राह्मणा इति सर्वत्रानुषजेत् १७ स्नेहवदमाँसमन्नं भोजयित्वा विदुषो ब्राह्मणानर्थसिद्धिँ वाचयेत् १८ बलिहरणस्यान्ते यामाशिषमिच्छेत्तामासीत १९ गृहपतिः--ओमक्षयमन्नमस्त्वित्याह २० भिक्षां प्रदाय सायंभोजनमेव प्रातराशेत् २१ विप्रोष्य गृहानुपतिष्ठेत् २२

इति वाराहगृह्ये सप्तदशं खण्डम्

इति वाराहगृह्यसूत्रम्